# संस्कृत वार्ताः

**दिनाङ्क :-08.01.2025** **प्रात: - 06:55**

## अथ वार्ता:

### प्रधानमन्त्री-आन्ध्रप्रदेश:

प्रधानमन्त्री नरेन्द्रमोदी अद्य आन्ध्रप्रदेशस्य विशाखापत्तनमस्थले द्विलक्ष-कोटिरूप्यकाणां विभिन्नानां विकासपरियोजनाम् उद्घाटनं कृत्वा राष्ट्राय समर्पयिष्यति। श्रीमोदी विशाखापत्तनमस्थलं निकषा पुडीमदकाइत्यत्र अत्याधुनिकस्य एनटीपीसी. ग्रीन-एनर्जी-लिमिटेड इत्यस्य ग्रीन-हाइड्रोजन हब-इत्यस्या: परियोजनाया: आधारशिलां स्थापयिष्यति। राष्ट्रिय-हरित-हाइड्रोजन-अभियानस्य अन्तर्गतं प्रथमं तावत् एतत् ग्रीन-हाइड्रोजन-हबइति भविष्यति। अस्या: परियोजनाया: कृते पञ्चाशीत्यधिकैक-लक्ष-सहस्र-कोटिरूप्यकाणां निवेश: करिष्यते। प्रधानमन्त्री रेल-मार्ग-सम्बद्धानां नैकासां परियोजनानामपि आन्ध्रप्रदेशे उद्घाटनं शिलान्यासं च करिष्यति।

### प्रवासिभारतीयदिवस:

अष्टादशमं प्रवासि-भारतीय-दिवस-सम्मेलनमद्य ओडिशाया: भुवनेश्वरे समारभते। ओडिशाप्रशासनं पञ्चाशद्देशेभ्य: भारतं प्रति आगम्यमानानां प्रवासिभारतीयानां समक्षे राज्यस्य समृद्धसंस्कृतिं न्यासं च प्रदर्शयति इति। अस्य सम्मेलनस्य शुभारम्भ: युवप्रवासिभारतीयदिवसकार्यक्रमेण सह क्रियते यस्यायोजनं ओडिशाप्रशासनं युवविषयक-क्रीडामन्त्रालयेन सह सहभागित्वेन सम्पादयति। प्रधानमन्त्री नरेन्द्रमोदी श्व: एतस्मिन् सम्मेलने भागं भजिष्यति तत्रैव राष्ट्रपति: द्रौपदीमुर्मु: शुक्रवासरे समापनसत्रस्य अध्यक्षतां करिष्यति। तदनु राष्ट्रपति: विविधेषु क्षेत्रेषु मान्यप्राप्तेभ्य: प्रवासि-भारतीयेभ्य: प्रवासि-भारतीय-सम्मानं प्रदास्यति। त्रिनिदाद-टोबैगो-इत्येतस्य राष्ट्रपति: क्रिस्टीन-कार्ला-कंगालूइत्यसौ अस्य संस्करणस्य मुख्यातिथित्वेन उपस्थितो भविष्यति।

### एकं राष्ट्रम् एकं निर्वाचनम्

एकं राष्ट्रम् एकं निवार्चनमित्यनेन सम्बद्धयो: द्वयो: विधेयकयो: संयुक्त-संसदीय-समित्या: प्रथमोपवेशनम् अद्य सम्पादयिष्यते। विधेयकद्वयम् आधिकारिकरूपेण संविधान-नवविंशत्यधिकैकशततमं संशोधविधेयकं चतुर्विंशत्यधिक-द्विसहस्रतमवर्षीयम् अपि च केन्द्रशासित प्रदेश-विधि-संशोधन-विधेयकं चतुर्विंशत्यधिक-द्विसहस्रतमवर्षमिति नाम्ना अभिज्ञायते। विधिन्यायमन्त्रालयस्य प्रतिनिधिय: प्रस्तावितविधे: प्रावधानानां विषये सदस्येभ्य: सूचनां प्रदास्यन्ति। नवत्रिंशत्-सदस्यात्मिक-समित्यां लोकसभाया: सप्तविंशतिसदस्या: राज्यसभात: द्वादशसदस्या: सम्मिलिता: सन्ति।

### इसरो-इति अध्यक्ष:

केन्द्रेण वी.नारायणन्-इत्यसौ भारतीयान्तरिक्षानुसन्धान-सङ्घटनस्य इस्रो इत्येतस्य अध्यक्ष: अन्तरिक्ष-विभागस्य सचिव: च नियुक्त:। वी.नारायणन् इत्येष: अस्य मासस्य चतुर्दश-दिनाङ्के स्वकार्यभारं स्वीकरिष्यति। असौ निवर्तनमानस्य अध्यक्षस्य एस्.सोमनाथस्य स्थाने आगच्छतीति। नारायणन् इत्ययं वर्तमानसमये केरलस्य वलियामालायां इस्रोइत्यस्य लिक्विड-प्रोपल्शन-सिस्टम-लिक्विड-प्रोपल्शन-सिस्टम-सेण्टर-इत्यस्य विभागस्य निदेशकत्वेन कार्यं समाचरति। असौ प्रक्षेपास्रजगति एक: सुविख्यात: वैज्ञानिको वर्तते।

### निर्वाचनायोग:-दिल्लीविधानसभा

दिल्ली-विधानसभा-निर्वाचनं एकस्मिन्नेव चरणे फरवरीमासस्य पञ्चमे दिनाङ्के समनुष्ठास्यते तत्रैव मतगणना अष्टमे दिनाङ्के निर्धारितास्ति। निर्वाचनायोगेन ह्य: सप्तति-सदस्य-युताया: दिल्लीविधानसभाया: निर्वाचनाय समुद्घोषणा कृता। ह्य: नवदिल्ल्यां वार्ताहरान् संसूचयन् मुख्यनिर्वाचना-युक्त: राजीवकुमार: अकथयत् यत् सम्बद्धाधिसूचना अस्य मासस्य दशमे दिनाङ्के प्रख्यापयिष्यते। मुख्यनिर्वाचनायुक्तेन ईवीएम् यन्त्रसम्बद्धान् आरोपान् अपि निराकृता:।

### हॉकीइण्डिया-लीग

हॉकीइण्डियालीगइत्येतस्यां प्रतिस्पर्धायां वेदान्ता-कलिंगा-लांसर्स दलेन श्राची-राढ-बंगाल-टाइगर्सदले षड्-शून्यं इत्यङ्कान्तरालस्य विजयेन सह प्रथमो विजय: अधिगत:।

**।।इति वार्ता:।।**